# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-२ ( Sem_4 )** **प्रश्नपत्र-६** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CC 2.4.8 **समयः - ०३:०० तः ०६:००**

**दिनाङ्कः - २३-०४-२०१६** **सन्दर्भग्रन्थः - महाभारते मोक्षधर्मपर्व**

---

**युनिट-१**

**प्रश्नः -१** **पद्यद्वयस्य सन्दर्भसहितां व्याख्यां कुरुत ।** **०८**

*(१) शोकस्थानसहस्राणि भयस्थानशतानि च ।*
*दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥*

*(२) श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।*
*न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥*

*(३) आशा बलवती राजन् नैराश्यं परमं सुखम् ।*
*आशां निराशां कृत्वा तु सुखं स्वपिति पिङ्गला ॥*

**प्रश्नः -२** **के षड्गुरवो दर्शिताः कस्माच्चेति सविस्तरं विवेचयत ।** **०८**

**अथवा**

**मङ्किगीताविवेचनं विधीयताम् ।**

**प्रश्नः -३** **द्वयोः टिप्पणी कार्या ।** **०४**

*(१) शम्पाकोपदेशः ।* *(२) आजगरवृत्तिः ।*

*(३) पुत्रोपदेशः ।* *(४) आत्महत्यापापम् ।*

**प्रश्नः -४** **अधोलिखितेषु पञ्चानां लघूत्तराणि लिखत ।** **०५**

*(१) मोक्षधर्मपर्व कस्मिन् पर्वणि आगच्छति ?*

*(२) महाभारते कति मुख्यपर्वाणि सन्ति ?*

*(३) महाभारतस्य रचयिता कः ?*

*(४) मनुष्यत्वं कस्मात् कारणात् श्रेष्ठम् ?*

*(५) इन्द्रः केन रूपेण आगतः ?*

*(६) पूर्वकृतं कर्म कमनुगच्छति ?*

*(७) यथा वत्सो मातरं विन्दति तथा किं कं विन्दति ?*

**युनिट-२**

**प्रश्नः -५** **पद्यद्वयस्य सन्दर्भसहितां व्याख्यां कुरुत ।** **०८**

*(१) सत्यं ब्रह्म तपः सत्यं सत्यं विसृजते प्रजाः ।*
*सत्येन धार्यते लोकः स्वर्गं सत्येन गच्छति ॥*

*(२) गुरुभ्य आसनं देयं कर्तव्यं चाभिवादनम् ।*
*गुरुनभ्यर्च्य युज्यन्ते आयुषा यशसा श्रिया ॥*

*(३) प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः ।*

*तद्वद् भूतानि भूतात्मा सृष्टानि हरते पुनः ॥*

**प्रश्नः -६ सदाचारदुराचार विवेचनं ग्रन्थानुसारं कुरुत । ०८**

**अथवा**

**वानप्रस्थसंन्यासाश्रमयो विविधान् धर्मान् विवेचयत ।**

**प्रश्नः -७ चत्वारि लघूत्तराणि दीयन्ताम् । ०४**

*(१) 'उच्छवृत्ति'र्नाम किम् ?* *(२) ब्राह्मणः द्विजः कस्मात् कथ्यते ?*

*(३) 'अतिथिः' कः कथ्यते ?* *(४) अतिथिः पुण्यमादाय कदा गच्छति ?*

*(५) द्वितीय आश्रमः कः ?* *(६) प्रथमे आश्रमे मुख्यं कर्म किम् ?*

**युनिट-३**

**प्रश्नः -८ पद्यद्वयस्य सन्दर्भसहितां व्याख्यां कुरुत । ०८**

*(१) सत्यं वेदेषु जागर्ति फलं सत्ये परं स्मृतम् ।*

*सत्याद् धर्मो दमश्चैव सर्वं सत्ये प्रतिष्ठितम् ॥*

*(२) अक्षरात् खं ततो वायुस्ततो ज्योतिस्ततो जलम् ।*

*जलात् प्रसूता जगती जगत्यां जायते जगत् ॥*

*(३) अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः ।*

*आरोग्यं प्रियसंवासो गृध्येत् तत्र न पण्डितः ॥*

**प्रश्नः -१० इन्द्रियातिरिक्तं ब्रह्मतत्त्वं सविस्तरं ग्रन्थानुसारं विवेचयत । ०८**

**अथवा**

**जापकब्राह्मणवृत्तान्तं ग्रन्थानुसारं विवेचयत ।**

**प्रश्नः -११ टिप्पणीद्वयं लिखत । ०४**

*(१) मोक्षधर्मः ।* *(२) इक्ष्वाकुः ।*

*(३) ईश्वरसाक्षात्कारः ।* *(४) वेदमाता गायत्री ।*

**प्रश्नः -१२ पञ्चानां लघूत्तराणि लिखत । ०५**

*(१) शान्तिपर्वणि कः रसः ?*

*(२) वेदाङ्गानि कति सन्ति ? अङ्गद्वयं लिखत ।*

*(३) गाङ्गेयः कः प्रोक्तः ?*

*(४) धर्मपुत्रः कः ?*

*(५) बाहुजीविनः के भवन्ति ?*

*(६) ब्राह्मणस्य कति कर्माणि ?*

*(७) अहेः पादान् कः पश्यति ?*

---------------------